IJSRST
© 2017 IJSRST | Volume 3, Issue 7, September-October-2017
Print ISSN: 2395-6011 | Online ISSN: 2395-602X | Page No 1405-1410

# अर्थप्रकृतिविवेचनपुरस्सरं मल्लिकामकरन्दप्रकरणस्थार्थप्रकृतिनिरूपणम्



**श्वेता अवस्थी**
**(शोधच्छात्रा)**
**राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ**

**शोधलेखसार:-** विस्तृतेऽस्मिन् संस्कृतवाङ्गमये नाट्येऽर्थप्रकृतय: पञ्च संख्याका: भवन्ति। अभिनवगुप्तादा: तत्रैव अन्यसम्मतमर्थप्रकृतेरर्थं निर्दिशति- अर्थस्य समस्तरूपकवाच्यस्य प्रकृतय: प्रकरणानि अवयवार्थखण्डा: इत्यर्थप्रकृतय:। भोजराजानुसारेण- अर्थप्रकृतय: पञ्च कथादेहस्य हेतव: इति। नाट्यदर्पणानुसारम् पञ्च अर्थप्रकृतय: चेतनाचेतनारूपेण द्विधा भवन्ति। इत्येतेषु बीजम्,कार्यञ्च द्वावेव अचेतनात्मकरूपौ, बिन्दु:,पताका,प्रकरी च चेतनात्मकरूपेण प्रकरणेषु नाटकेषु च स्व-स्व कार्यं विदधति। पुन: अचेतनोपाय: द्विधा भवति मुख्यामुख्यभेदेन इत्येतेषु बीजं मुख्यं भवति, यतोहि तन्मूलकमेवान्ये उपाया: सन्ति, कार्यन्तु मुख्यमेव। चेतनोपायमपि पुन: द्विप्रकारकं भवति - मुख्यम्, उपकरणभूतञ्च। मुख्यं बिन्दु: अस्ति, यतोहि एतत् कार्यप्रधानस्य फलस्यानुसन्धानस्य अवच्छेदकहेतु: भवति।नाट्यदर्पणाकरेण विवरणकारा: पञ्चार्थप्रकृतीनां चेतनाचेतनत्वेन एवञ्च मुख्यरूपेणावन्तरविभागमपि कृतम्। परन्तु ते नाट्यदृष्ट्या बहूमहत्वपूर्णं न भवन्ति। नहि प्रकृतोपयोगी एव प्रतीयन्ते। अत एव धनञ्जय-विश्वनाथादिभि: आचार्यै: नोल्लेखं कृतम्। बीजं-बिन्दु- कार्यञ्चेमे आवश्यकार्थप्रकृतिरूपेण सिद्ध्यन्ति। यतेहि इमे सर्बेषु रूपकेषु व्याप्ता: सन्ति। पताकाया: एवञ्च प्रकर्या: सर्वेषु रूपकेषु उपस्थिति:,वर्णानञ्च नैव आवश्यकम्। नाट्यशास्त्रेऽर्थप्रकृतीनां महत्वपूर्णं स्थानमस्त्येव।

**मुख्यशब्दा:-** बीजम्,बिन्दु:,पताका,प्रकरी,कार्यम्।

विस्तृतेऽस्मिन् संस्कृतवाङ्गमये नाट्येऽर्थप्रकृतय: पञ्च संख्याका: भवन्ति।

**बीजबिन्दूपताकाख्यप्रकरीकार्यलक्षणा:।**

**अर्थप्रकृतय: पञ्च ता एता: परिकीर्तिता:॥**[1]

नाट्ये पञ्च अर्थप्रकृतय: इतिवृत्तसम्बन्धा:भवन्ति। बीजम्, बिन्दु:, पताका, प्रकरी, कार्यञ्च।

आचार्यधनिकोऽतिसंक्षेपतोऽवलोकवृत्तौ वक्ति-

**अर्थप्रकृतय: प्रयोजनसिद्धिहेतव:।**[2]

विषयेऽस्मिन् आर्याणामतान्तराणि सन्ति।

**अभिनवगुप्तपादेनोक्तम्-**

**यत्रार्थ: फलं तस्य प्रकृतय उपाया:** फलहेतव:[3]

अभिनवगुप्तादा: तत्रैव अन्यसम्मतमर्थप्रकृतेरर्थं निर्दिशति- अर्थस्य समस्तरूपकवाच्यस्य प्रकृतय: प्रकरणानि अवयवार्थखण्डा: इत्यर्थप्रकृतय:। भोजराजानुसारेण- अर्थप्रकृतय: पञ्च कथादेहस्य हेतव: इति। एवमेव सागरनन्दिनो

मतम्- नाटकीयवस्तुनः पञ्चप्रकृतयः स्वभावा भवन्ति। नैतान् परित्यज्य नाटकर्थाः सम्भवन्तीति। साहित्यदर्पणकारेणापि उक्तम्-

**बीजं बिन्दुः पताका च प्रकरी कार्यमेव च।**

**अर्थप्रकतयः पञ्च ज्ञात्वा योज्या यथाविधि॥**[4]

रामचन्द्रगुणचन्द्रप्रणीतनाट्यदर्पणानुसारम्-

**बीजं पताका प्रकरी, बिन्दुः कार्यं यथारूचि।**

**फलस्य हेतवः पञ्च चेतनाचेतनात्मकः॥**[5]

नाट्यदर्पणानुसारम् पञ्च अर्थप्रकृतयः चेतनाचेतनारूपेण द्विधा भवन्ति। इत्येतेषु बीजम्,कार्यञ्च द्वावेव अचेतनात्मकरूपौ, बिन्दुः,पताका,प्रकरी च चेतनात्मकरूपेण प्रकरणेषु नाटकेषु च स्व-स्व कार्यं विदधति। पुनः अचेतनोपायः द्विधा भवति मुख्यामुख्यभेदेन इत्येतेषु बीजं मुख्यं भवति, यतोहि तन्मूलकमेवान्ये उपायाः सन्ति, कार्यन्तु मुख्यमेव। चेतनोपायमपि पुनः द्विप्रकारकं भवति - मुख्यम्, उपकरणभूतञ्च। मुख्यं बिन्दुः अस्ति,यतोहि एतत् कार्यप्रधानस्य फलस्यानुसन्धानस्य अवच्छेदकहेतुः भवति।

**यथा भावप्रकाशे निगदितमस्ति-**

**फले प्रधाने विच्छिन्ने, बीजस्यावान्तरैः फलैः।**

**तस्विच्छेदको हेतुः, बिन्दुरित्याह कोहलः॥**[6]

उपर्युक्तोपकरणभूतोपायमपि द्विधा भवति - स्वार्थसिद्धियुक्त परार्थसिद्धिपरकञ्चेति। संक्षेपेण वदामश्चेत् चेतनाचेतनोपायानां मध्ये बीजबिन्द्वोः एव प्राधान्यं भवति। यतेहि इमौ समस्तनाटकेषु व्याप्ताः भवन्ति। अभिनवगुप्तपादः अर्थप्रकृतिशब्दस्यार्थः करोति - अर्थः फलं तस्य प्रकृतयः उपायाः फलं हेतवः इत्यर्थः

नाट्यदर्पणाकरेण विवरणकाराः पञ्चार्थप्रकृतीनां चेतनाचेतनत्वेन एवञ्च मुख्यरूपेणावन्तरविभागमपि कृतम्। परन्तु ते नाट्यदृष्टया बहूमहत्वपूर्णं न भवन्ति। नहि प्रकृतोपयोगी एव प्रतीयन्ते। अत एव धनञ्जय-विश्वनाथादिभिः आचार्यैः नोल्लेखं कृतम्।

बीजं-बिन्दु-कार्यञ्चेमे आवश्यकार्थप्रकृतिरूपेण सिद्ध्यन्ति। यतेहि इमे सर्बेषु रूपकेषु व्याप्ताः सन्ति। पताकायाः एवञ्च प्रकर्याः सर्वेषु रूपकेषु उपस्थितिः,वर्णानञ्च नैव आवश्यकम्। बीजनामकार्थप्रकृतिविषये साहित्यदर्पणकारो वक्ति-

**अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।**

**फलस्य प्रथमो हेतुर्बीजं तदभिधीयते॥**[7]

फलस्य च यन्मुख्यकारणं तत् बीजं कथ्यते। नाट्यदर्पणे बीजस्य परिभाषां प्रकाशयन् गुणचन्द्ररामचन्द्रौ वदतः-

**स्तोकोद्दिष्टः फलप्राप्तः हेतुबीजं प्रोहणात्।।**[8]

अर्थात् आदौ गम्भीरत्वादल्पनिक्षिप्तो मुख्यफलावसानसश्चयो: हेतुर्मुख्यं साध्योपाय: स धान्यबीजवत् बीजम् प्ररोहणात् उत्तरत्र शाखोपशाखादिभिर्विस्तरात्। इदं च आमुखानन्तरं निषिध्यते। बीजं हि नाटकादीनामितिवृत्तार्थस्योपाय:। आमुखं तु रूपकप्रस्तावनार्थं नटस्यैव वृत्तम्। मल्लिकामकरन्दप्रकणे बीजनामकार्थप्रकृतेर्वर्णनम्- मल्लिकामकरन्दप्रकरणस्य प्रथमाङ्केऽष्टमे श्लोके बीजनामकार्थप्रकृते: वर्णनं सम्प्राप्यते।

**काव्यैर्यत्र कविप्रथा धनलव क्रीतैरपि प्राप्यते,**

**गुल्फक्लेशमुपासितुं कृतधियां कस्तत्र काले क्रम:।**

**ग्रथ्नन्तस्तदपि प्रबन्धकुसुमान्याजन्म खिद्यामहे,**

**कुर्यामो व्यसने चिरं विरचिते कस्मै परस्मै वयम्॥**[9]

उपर्युक्तश्लोके नायकोक्तनिराकरणीयविपत्ते: बीजरूपेण निर्देशनं सम्प्राप्यते। प्रथमाङ्के यदा मकरन्द-पुरूष-मल्लिकानां मध्ये वार्ता प्रचलति तत्काले मकरन्द: वक्ति यत्- नाहं चौर: न हि व्यभिचारी, अत: मां मुञ्चतु-नाहं चौरो जारो वा तदा मल्लिका वक्ति यत् - एष: कोऽपि आभरणलोभेन मम जीवितं अपहर्तुकाम: तस्कर:। महाभाग! गृहाण एतानि मे आभरणानि। अन्यदपि ते द्रविणजातं बहुतरनेष्यामि। कुरू एतया असिधेन्वा कण्ठपीठे जीवितेशकर्म, येन दु:खमोक्षो भवति।[10] इत्यत्र मल्लिका यदा वक्ति- येन दु:खेन मोक्षो भवति तत् अतिधेन्वा मे कण्डीठे प्रहारं करोतु। इत्यत्र प्रकरणे कण्ठपीठोपरि प्रहारं दु:खेन मोक्ष: बीजरूपेण विद्यते। तदनन्तरं मकरन्दस्य मल्लिकाप्राप्तिस्वरूपेष्टिसिद्धे: अपि बीजरूपेण निबन्धनं विद्यते-

**करिष्यामि कण्ठपीठे जीवितेशकर्म, किन्तु भुजपञ्जरपाशेन न पुनरसिधेनुकया।।**[11]

मकरन्द: वक्ति यत् कण्ठोपरि यमराजोचितं कार्यं विदधामि परन्तु भुजपञ्जररूपी( आलिङ्गनरूपी) पाशेन न तु कृपाणेन। इत्यत्रैव बीजं कथाप्रवाहे क्रमश: शाखोपशाखासु विकसिते भवन् अन्तिमफलस्य प्राप्ते: साधनरूपेण प्रतिष्ठितम्। प्रकृतप्रकरणेऽनिष्टनिवृत्तिपूरिवकम् इष्टसिद्धे: वर्णनं कृतम् आचार्येण । अत: द्वयो: यद्यपि स्वतन्त्ररूपेण मुख्यफलं नैव कथितुं शक्यते,तथापि अनिष्टनिवृत्तिविशिष्ट -इष्टसिद्धि: अथवा इष्टसिद्धिविशिष्ट: अनिष्टनिवृत्तिं मुख्यफलं तु कथितुम शक्यते एव। ग्रन्थकारेणैव एतादृशमेव प्रकटितम्। द्वितीयार्थप्रकृतिरस्ति बिन्दु:। बिन्दुस्त्ववान्तरबीजमिति संज्ञितम्। धनञ्जयो बीजं सूचयित्वा बिन्दुं परिभाषते-

**अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।।**[12]

यत्र अवान्तरकथयार्थे विच्छिन्ने सति, इति वृत्तस्य योजनेऽग्रे सारणेन यत्कारणं तथैव परिसर्पति। यथा- तैलबिन्दु: प्रसरति ।अतोऽस्यान्वर्थकता।

**साहित्यकारो बिन्दुं परिभाषते –**

**अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।।** [13]

**नाट्यशास्त्रे चैवं निरूपितम्-**

© 2017 IJSRST | Volume 3, Issue 7, September-October-2017
Print ISSN: 2395-6011 | Online ISSN: 2395-602X | Page No 1405-1410

**प्रयोजनानां विच्छेदे यदविच्छेदकारणम्।**

**यावत्समाप्तिर्बन्धस्य स बिन्दु- परिकीर्तित:॥**[14]

नाटकप्रकरणीयाख्याने आवश्यकानां कार्यजन्यव्यवधानस्य निवार्णार्थं नायकादिगतोपायानुसन्धानस्य योजना बिन्दु: कथ्यते। नाट्यदर्पणकारेणापि प्रतिपादितं यत्–

**हेतोश्छेदेऽनुसन्धानं बहूनां बिन्दुराफलात्।।**[15]

अर्थात् उपायानुष्ठानस्य–आवश्यककर्तव्यादिना व्यवधाने सति नायकप्रतिनायकमित्यादीनां यदनुसन्धानं ज्ञानमसौ ज्ञानविचारमफललाभोपायत्वात्बिन्दु:। सर्वव्यापित्वात् वा जले तैलबिन्दु: इव बिन्दु:। बीजनामकार्थप्रकृते: आरम्भो मुखसन्धिना भवति।

**आफलादिबीजवत् समस्तेतिवृत्तव्यापकत्वमाह। केवलं बीजं मुखसन्धेरेवप्रभृतिनिबध्यते विन्दुस्तुतदन्तरमिति।**[16]

मल्लिकामकरन्दनामके प्रकरणे द्वितीयाङ्कस्यान्ते यदा विद्याधर: मल्लिकाया अपहरणं कृतम् , तथा मल्लिकाया: रक्षणे असमर्थ: मकरन्द: आत्मघातप्रयासावसरे भारूण्डनामकपक्षी आसीत्, सा पक्षी तं मकरन्दं अचेतनावस्थायां रत्नसानुनामके पर्वते स्थापयति।तथा घटनाक्रमेऽस्मिन् मख्यवृत्ते: विस्मरणे सति, पुन: सचेतनावस्थाप्राप्त–मकरन्देन मल्लिकासदृशध्वने: श्रवणानन्तरं मूलकथाया: अथवा उपायानुष्ठानस्य पुन: स्मरणमित्यत्र –

**कथमेष सल्लिकानुसारी ध्वनि: पश्चात् निश्चितमयं विरहव्यथाभिर्मरणोन्मुखाया: मल्लिकाया: धवनि: उपर्युक्तकथनेषु बिन्दु: उपन्यस्तमस्ति।**[17]

**पताका- व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीते**[18] अर्थात् निर्वहणपर्यन्तं प्रासङ्गिको वृत्तान्त: पताका कथ्यते। उक्तञ्च भरतमुनिना–

**यदवृत्तन्तु परार्थं स्यात् प्रधानस्योपकारकम्।**

**प्रधानवच्च कल्पेत सा पताकेति कीर्तिता॥**[19]

नाटकस्य प्रकरणस्य च स प्रासङ्गिकवृत्तं यस्य नायक: मूलकथानाकस्य नायकस्य साहाय्यं करोति तथा च स्वस्य लक्ष्यसिद्धि नायकस्य सहयोगेनैव प्राप्यते, तेन वृत्तं पताका कथ्यते। पताका नायकस्य स्वकीयं फलं न भवति।

**सानुबन्धं पताकाख्यम्** [20] इति दशरूपके धनञ्जयेन भणितम्।नाट्यदर्पणे पताकाया: लक्षणं दीयते कविना–

**आविमर्शं पताका चेत्, चेतन: स परार्थकृत्।।** [21]

सानुबन्धमिति यदाधिककारिकं वस्तु दूरं यावदनुवर्तते सा पताका। यथा पताका राजादीनां मुख्यनायकानां चिह्नं भवति,ताननुवर्तते। ते यत्र यत्र गच्छन्ति तत्र सा नीयते द्योतयति च तेषामुपस्थितिम्। तथैवेयं पताका आधिकारिकमितिवृत्तं दूरं यावदनुवर्तते, एवञ्च मुख्यनायकस्य पोषिका भवति। पताकाया अपि नायको भवति, स पताकास्थानक इति कथ्यते।

रामचन्द्रसूरिविरचितेऽस्मिन् प्रकरणे वैश्रवणः एवञ्च मनोरमा पताका नायकत्वेन वर्णितौ स्तः। द्वयोः पात्रयोः स्वार्थसिद्धिपूर्वकं प्रधानफलसिद्धये नायकस्य साहाय्यकत्वेन वर्णितमस्ति। अतः लक्षणानुसारं द्वयोः स्वार्थसिद्धिरपि विमर्शसन्धेः पूर्वमेव गर्भसन्धेः अन्ते वर्णितमस्ति।

**प्रकरी-** भरतमुनिः प्रकरीविषये वक्ति–

**फलं प्रकल्प्यते यस्याः परार्थायैव केवलम्।**

**अनुबन्धं विहीनत्वात् प्रकरीति विनिर्दशेत्॥**[22]

प्रकर्षेण स्वार्थानपेक्षया करोतीति प्रकरी। भावप्रकाशे यथा –

**शोभायै वैदिकादीनां यथा पुष्पक्षतादयः।**

**अथर्तुवर्णनादिस्तु प्रसङ्गे प्रकरी भवेत्॥**[23]

**नाट्यदर्पणकारः प्रकरीं परिभाषते-**

**प्रकरी चेद् क्वचिद् भावो , चेतन्योऽन्यप्रयोजनः।।**[24]

प्रकर्षेण स्वार्थानपेक्षया करोतीति प्रकरी।

**साहित्यदर्पणे यथा- प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।।**[25]

दशरूपककारोऽपि इत्थं वक्ति–

**प्रकरी च प्रदेशभाक्**[26]

यच्च स्वल्पं वस्तु, एकदेशवर्ति सा प्रकरी। प्रकरी सीमितं स्वल्पवस्तु तच्चैकदेशवर्ति।

**भरतो प्रकरीं परिभाषते-**

**फलं प्रकसल्प्यते यस्याः परार्थायैव केवलम्।**

**अनुबन्धविहीनत्वात् प्रकरीति विनिर्दिशेत्॥**[27]

प्रकरणेऽस्मिन् गन्धमूषिकायाः योजना प्रकरिरूपेणोपनिबद्धम् आचार्येण रामचन्द्रसूरिणा। एतस्या अपि उपनिबन्धनं पताका इव मुख्यफलसिद्धये नायकस्य सहायकरूपेण कृतम्।

**सन्दर्भग्रन्थसूची-**

1.दशरूपकम्–1.18

2.अवलोकवृत्तम्–23

3.नाट्यशास्त्रम्–19/20

4.नाटकलक्षणत्नकोश–6.1

5.साहित्यदर्पणः–6.64/65

6.नाट्यदर्पणः–1.28

© 2017 IJSRST | Volume 3, Issue 7, September-October-2017
Print ISSN: 2395-6011 | Online ISSN: 2395-602X | Page No 1405-1410

7.भावप्रकाशः-2.3

8.अभिनवभारती-19.20

9.साहित्यदर्पणः-6.65/66

10.नाट्यदर्पणः-1.26

11.मल्लिकामकरन्दम्-1.8

12.मल्लिकामकरन्दम्-1.17

13.मल्लिकामकरन्दम्-1.17(गद्यम्)

14.दशरूपकम्-1.17

15.साहित्यदर्पणः-6.66

16.नाट्यशास्त्रम्-21.22

17.नाट्यदर्पणः-1.34

18.नाट्यदर्पणः-1.34(वृत्तिः)

19.मल्लिकामकरन्दम्-3.89(वृत्तिः)

20.नाट्यशास्त्रम्-21.23

21.दशरूपकम्-1.21

22.नाट्यदर्पणः-1.29

23.नाट्यशास्त्रम्-21.24

24.नाट्यदर्पणः-1.31

25.साहित्यदर्पणः-6.68

26.दशरूपकम्-1.13

27.नाट्यशास्त्रम्-19.25